# Vishnuproktam Shivarchanopadesham 3

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૩

## Document Information

Text title : Vishnuproktam Shivarchanopadesham 3

File name : viShNuproktaMshivArchanopadesham3.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 26 kumbhaghoNamahimAnuvarNanam | 11-32.1||

Latest update : June 16, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 16, 2024

*sanskritdocuments.org*

# વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશમ્ ૩

(શિવરહસ્યાન્તર્ગતે ઉગ્રાખ્યે)
વિષ્ણુરુવાચ
સર્વવેદશ્રુતં પુણ્યં જ્ઞાનવૈરાગ્યદં નૃણામ્ ।
શિવલિઙ્ગાર્ચનં કાર્યં મુક્ત્યર્થં ભસ્મભૂષણૈઃ ॥ ૧૧॥

મહાદેવાર્ચનં બ્રહ્મન્ ચતુર્વર્ગફલપ્રદમ્ ।
તત્ફલં પ્રાપ્યતે સર્વૈઃ શઙ્કરસ્યૈવ પૂજયા ॥ ૧૨॥

શઙ્કરારાધનં યેન ન કૃતં સાવધાનતઃ ।
સ દુર્ભગો દુરાચારો દુર્બુદ્ધિશ્ચ ન સંશયઃ ॥ ૧૩॥

યાવન્તો દુભઙ્ગાઃ સન્તિ દરિદ્રાશ્ચ કુરૂપિણઃ ॥

તે ત્યક્તશાઙ્કરાચારાઃ સમ્ત્યક્તશિવપૂજનાઃ ॥ ૧૪॥

ન યેન પૂજ્યતે દેવઃ શઙ્કરઃ પ્રત્યહં મુદા ।
તેન સમ્પ્રાપ્યતે દુઃખં યાતના ચ તનુવ્યયે ॥ ૧૫॥

ભૂતં ભવ્યં ભવિષ્યચ્ચ ભાગ્યં યસ્ય ભવિષ્યતિ ।
તસ્યૈવ મુક્તિર્ભવતિ ભવાનીપ્રાણવલ્લભે ॥ ૧૬॥

ભગવાન્ ભગવિધ્વંસી ભવાનિ પ્રાણવલ્લભે ।
ભૂરિભાગ્યપ્રભાવેણ ભાવ્યતે ભુવિ ભાવુકૈઃ ॥ ૧૭॥

અશૈવકૃતકર્માણિ વેદોક્તાન્યપિ પદ્મજ ।
વૃથા ભવન્તિ સર્વાણિ પાતકં પ્રત્યુતાધિકમ્ ॥ ૧૮॥

અશૈવૈર્વૈદિકં કર્મ ન કર્તવ્યં કદાચન ।
અશૈવાનાં વૈદિકેષુ ન કર્મસ્વધિકારિતા ॥ ૧૯॥

અશૈવો યત્કુલે જાતઃ તત્તુ દુષ્કર્મસઙ્કુલમ્ ।
સમ્પાદનીયા યત્નેન શિવભક્તિસ્તપોબલાત્ ॥ ૨૦॥

શૈવભક્તિર્મુક્તિદાત્રી યા ભક્તિઃ સ્યાદનન્યગા ।
કિમશ્વમેધયાગાદ્યૈઃ વિસૃષ્ટાન્નૈઃ સુદક્ષિણૈઃ ॥ ૨૧॥

યદિ ન સ્યાન્મહાદેવે ભક્તિરવ્યભિચારિણી ।
કિમત્યુત્તમગોદાનેર્બહુભિર્ભૂરિદક્ષિણૈઃ ॥ ૨૨॥

યદિ ન સ્યાન્મહાદેવે ભક્તિરવ્યભિચારિણી ।
કિમન્નદાનૈઃ કિં તીર્થૈઃ કિં તપોભિરનુત્તમૈઃ ॥ ૨૩॥

યદિ ન સ્યાન્મહાદેવે ભક્તિરવ્યભિચારિણી ।
યેન ધ્યાતો મહાદેવઃ ક્ષણં વા સાવધાનતઃ ॥ ૨૪॥

તેન ધર્માઃ કૃતાસ્સર્વે સર્વદા સાવધાનતઃ ।
સ ભાગ્યવાન્ સ પુણ્યાત્મા સ તપોનિધિરાત્મવાન્ ॥ ૨૫॥

યોઽનન્યશરણો નિત્યં પૂજયેત્પાર્વતીપતિમ્ ।
સ કુલીનઃ સ વિદ્યાવાન્ સ સર્વગુણસંશ્રયઃ ॥ ૨૬॥

યોઽનન્યશરણો નિત્યં પૂજયેત્પાર્વતીપતિમ્ ।
સ સર્વયોગનિરતઃ સ સમાધિયુતઃ સદા ॥ ૨૭॥

યોઽનન્યશરણો નિત્યં પૂજયેત્પાર્વતીપતિમ્ ।
સ સર્વજ્ઞઃ સ પૂતાત્મા સ તત્વજ્ઞઃ સ ધર્મવિત્ ॥ ૨૮॥

યોઽનન્યશરણો નિત્યં પૂજયેત્પાર્વતીપતિમ્ ।
સ બુદ્ધિમાન સ નીતિજ્ઞઃ સ વિદ્વાન્ પણ્ડિતોત્તમઃ ॥ ૨૯॥

યોઽનન્યશરણો નિત્યં અર્ચયેત્ પાર્વતીપતિમ્ ।
કૃતાનિ ભૂરિ દાનાનિ ગ્રહણે ચન્દ્રસૂર્યયોઃ ॥ ૩૦॥

તસ્યૈવાનન્યગા ભક્તિર્ભવતિ શ્રીમહેશ્વરે ।
યે સન્તતં ભવિષ્યન્તિ દગ્ધસંસારવાસનાઃ ॥ ૩૧॥

તેષામનન્યગા શુદ્ધા શિવે ભક્તિઃ પ્રજાયતે । ૩૨.૧

॥ ઇતિ શિવરહસ્યાન્તર્ગતે વિષ્ણુપ્રોક્તં શિવાર્ચનોપદેશં ૩ સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૨૬ કુમ્ભઘોણમહિમાનુવર્ણનમ્ । ૧૧-૩૨.૧॥

- .. shrIshivarahasyam . ugrAkhyaH saptamAMshaH . adhyAyaH 26 kumbhaghoNamahimAnuvarNa
. 11-32.1..

Proofread by Ruma Dewan

*Vishnuproktam Shivarchanopadesham 3*
pdf was typeset on June 16, 2024

Please send corrections to *sanskrit@cheerful.com*